अन्ववतप्ताद् रहसः । (८१/९४९)

अनु अव तप्त इत्येतेभ्यः परो [1]यो रहस्शब्दः तदन्तात् [2]समासाद् अच् प्रत्ययः भवति । अनुरहसम् । अवरहसम् । तप्तरहसम् ॥

प्रतेरुरसः सप्तमीस्थात् । (८२/९५०)

प्रतेः परो य उरस्शब्दः[3] तदन्तात् समासात् अच् प्रत्ययो भवति, स चेद् उरस्शब्दः सप्तमीस्थो भवति । सप्तम्यर्थे वर्तते इत्यर्थः । उरसि वर्तते । विभक्त्यर्थे अव्ययम् (२.१.६/६५२) इति समासः । प्रत्युरसम्[4] । सप्तमीस्थात् इति किम् ? प्रतिगतमुरः प्रत्युरः ॥

अनुगवमायामे । (८३/९५१)

अनुगवम् इत्यच्प्रत्ययान्तं निपात्यते आयामे[5]ऽभिधेये[6] । अनुगवम् [7]यानम् । 'यस्य चायामः' (२.१.१६/६७०) इति समासः । आयामे इति किम् ? गवां पश्चादनुगु ॥

द्विस्तावा त्रिस्तावा वेदिः । (८४/९५२)

द्विस्तावा त्रिस्तावा इति निपात्यते वेदिश्चेद् अभिधेया भवति । अच्प्रत्ययः, टिलोपः, समासश्च निपात्यते । यावती [8]प्रकृतौ वेदिः ततो द्विगुणा वा त्रिगुणा वा कस्यांचिद्विकृतौ[9] तत्रेदं निपातनम् । द्विस्तावा वेदिः । त्रिस्तावा वेदिः । वेदिः इति किम् ? द्विस्तावती, [10]त्रिस्तावती रज्जुः ॥

उपसर्गादध्वनः । (८५/९५३)

उपसर्गात् परो योऽध्वन्शब्दः तदन्तात् समासात् अच् प्रत्ययो भवति[11] । प्रगतोऽध्वानं प्राध्वो[12]रथः । प्राध्वं शकटम् । निरध्वम् । [13]प्रत्यध्वम् । उपसर्गात् इति किम् ? परमाध्वा । उत्तमाध्वा ॥

तत्पुरुषस्याङ्गुलेः सङ्ख्याव्ययादेः । (८६/७८६)

अङ्गुलिशब्दान्तस्य तत्पुरुषस्य सङ्ख्यादेः[14] अव्ययादेश्च अच् प्रत्ययो भवति । द्वे अङ्गुली प्रमाणमस्य द्व्यङ्गुलम् । त्र्यङ्गुलम्[15] । तद्धितार्थ (२.१.५१/७२८) इति समासः । 'प्रमाणे लो द्विगोर्नित्यम्' (६.२.१२/३७४६ वा.) इति मात्रचो लोपः । अव्ययादेः – निर्गतम् अङ्गुलिभ्यः निरङ्गुलम् । [16]अत्यङ्गुलम् । तत्पुरुषस्य इति किम् ? पञ्चाङ्गुलिः[17] । [18]अत्यङ्गुलिः पुरुषः । तत्पुरुषाधिकारश्च द्वन्द्वाच्चुदषहान्तात् (५.४.१०६/९३०) इति यावत् ॥

---

1. यो नास्ति फ. 2. प्रातिपदिकात् क. 3. सप्तम्यर्थवृत्तिः इत्यधिकम् फ. 4. वर्तते इत्यधिकम् फ. 5. अर्थे इत्यधिकम् ड. 6. आयामो दैर्घ्यम् इत्यधिकम् ड. 7. शकटम् ड. 8. प्रकृतिः क. 9. भवति इत्यधिकम् ड.फ. 10. त्रिस्तावती नास्ति क. 11. समासान्तः इत्यधिकम् फ. 12. नरः फ. 13. अत्यध्वम् क. फ. 14. च इत्यधिकम् फ. 15. चतुरङ्गुलम् इत्यधिकम् ब.ड.फ, त्र्यङ्गुलम् नास्ति क. 16. अत्यङ्गुलम् नास्ति फ. 17. हस्तः इत्यधिकम् ब.क. 18. उदाहरणमिदं नास्ति क.फ, अनङ्गुलिः ब.ह, खङ्गुलिः ड.